तथा च यद्वाचकपदोत्तरमाभासशब्दः प्रयुज्यते तस्य दुष्टत्वं तेन गम्यते । रसाभासादावपि तिर्य्यग्योन्यादिगतत्वेन परनायकगतत्वेन च दुष्टत्वाद्रसाभासत्वम् । पुनरुक्तवदाभासादौ च न दुष्टत्वम् किन्तु पुनरुक्ताभिन्नत्वेनाभासमानत्वात् वस्तुतोऽपुनरुक्तत्वमेव गम्यते इत्येव तत्र विशेषः । "रस्यत इति रस इति व्युत्पत्तिदर्शनात् भावतदाभासाद्योऽपि गृह्यन्ते" सा०द० तत्र रसाभासः "मधु द्विरेफः कुसुमैकपात्रे"इत्यादि । "अत्र हि सम्भोगशृङ्गारस्य तिर्य्यग्विषयत्वाद्रसाभासत्वम्"सा०द०।"आपाततोयदर्थस्य पुनरुक्तावभासनम् । पुनरुक्तवदाभासः" सा० द० । भावे घञ् । २तुल्यप्रकाशे । आभास्यतेऽनेन आ+भास–णिच्–करणे अच् । ग्रन्थावतारणार्थं ४ग्रन्थाभिप्रायवर्णने व्याख्यानांशभेदे च ।

**आभासुर** त्रि० आ+भास–घुरच् । सम्यग्दीप्तिशीले ।

**आभास्वर** त्रि०आ+भास–वरच् । १सम्यग्दीप्तिशीले चतुःषष्टिमिते २गणदेवभेदे "आत्मा ज्ञाता दमोदान्तः शान्तिर्ज्ञानं शमस्तपः । कामः क्रोधोमदोमोहो द्वादशाभास्वरा इमे" इत्युक्ते ३द्वादशमिते गणभेदे च पु० । एषाञ्च स्वरूपस्याभास्वरत्वात्तथात्वम् ।

**आभिचरणिक** त्रि० अभिचरणं प्रयोजनमस्य ठञ् । अथर्व्ववेदादिप्रोक्ते शत्रुप्रभृतेर्मारणोच्चाटनवशीकरणादिरूपाभिचारसाधने १मन्त्रादौ तत्साधने २विधानभेदे च । "रौद्रं राक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृशेदपः" कात्या० १,१०,१४, "अभिचरणम् अभिचारः प्रयोजनमस्यासावाभिचारणिकः प्रयोजनमित्यर्थे ठञ् । "बधान देव ! सवितः परमस्यां पृथिव्यां शतेन पाशै र्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतोमा मौक्"यजु०१,२५,"द्विषतो बधोऽसि य०१२८ इत्यादि तत्र शत्रुनामादिसंयुक्तः अभिचारार्थमेव प्रयुज्यमान आभिचरणिक इत्युच्यते तेनाभिचरणबुद्ध्यभावे मन्त्रस्याभिचरणप्रयोजनाभावान्नाभिचरणिकत्वम् अतस्तदुच्चारणे उदकस्पर्शाभाव" कर्कः । एवमन्येऽपि मन्त्रा अथर्ववेदोक्ता ज्ञेयाः । तद्विधानञ्च अथर्ववेदान्तर्गते आङ्गिरसकल्पे विस्तृतम् । एवं तन्त्रोक्ताभिचारविधानम् तन्त्रसारादौ विस्तृतम् । अभिचार+प्रयोजनार्थे ठञ् । आभिचारिकोऽप्यत्र । स्त्रियामुभयत्र ङीप् ।

**आभिजन** त्रि० अभिजनादागतः अभिजनस्येदं वा अण् । अभिजनाद्वंशादागते "तां पार्वतीत्याभिजनेन नाम्ना" कुमा० । २वंशसम्बन्धिनि च । [ण्डित्ये ३सौन्दर्य्ये च ।

**आभिजात्य** न० अभिजातस्य भावः ष्यञ् । १कौलीन्ये २पा-

**आभिजित** त्रि० अभिजिति नक्षत्रे जातः अण् । अभिजिन्नक्षत्रे जाते तस्य वा लुक् । अभिजिदपि तत्रैवार्थे । अभिजित इदम् अण् । गवामयनान्तर्गताभिजिन्नामकदिनसम्बन्धिनि सामादौ त्रि० । [अभिजिद्भवे ।

**आभिजित्य** त्रि० अभिजिति भवः अण् ततः स्वार्थे यञ् ।

**आभिधा** स्त्री अभिधैव स्वार्थेऽण् । अभिधाशब्दार्थे १शब्दवृत्तिभेदे २कथने च

**आभिधातक** न० आभिधां तर्कति सहते अच् । शब्दे

**आभिधानीयक** न० अभिधानीयस्य भावः योपधगुरूपोत्तमत्वात् वुञ् । कथनीयत्वे

**आभिप्लविक** त्रि० अभिप्लवे विहितः ठक् । अभिप्लवविहित सूक्तसामादौ । अभिप्लवशब्दार्थस्य अभिप्लवशब्दे दृश्यः । तच्च साम "ज्योतिर्गौरायुर्गौरायुर्ज्योतिरित्यादि"सूक्ते गेयम् । अभिप्लवाय हितः ठक् । गवामयनान्तर्गतषडहभेदे पु० ।

**आभिमानिक** त्रि० अभिमानेन निर्वृत्तः ठक् । सांख्यमतसिद्धे अभिमानोत्पादिते उभयेन्द्रिये शब्दादिपञ्चतन्मात्रे च । यथैषामाभिमानिकत्वं तथोक्तं सां०प्र०भा० "तन्मात्रेन्द्रियाण्यभिमानवद्द्रव्योपादानकान्यभिमानकार्य्यद्रव्यत्वात् यन्नैवं तन्नैवम् यथा पुरुषादिरिति । नन्वभिमानवद्द्रव्यमेवासिद्धमिति चेत् अहं गौर इत्यादिवृत्त्युपादानतया चक्षुरादिवत् तत्सिद्धेः । अनेन चानुमानेन मन आद्यतिरेकिमात्रस्य तत्कारणतया प्रसाध्यत्वात् । अत्र चायमनुकूलस्तर्कः:"बहु स्यां प्रजायेयेत्यादि" श्रुतिस्मृतिभ्यस्तावद्भूतादिसृष्टेरभिमानपूर्व्वकत्वात् बुद्धिपूर्व्वकसृष्टौ कारणतयाभिमानः सिद्धः । तत्र चैकार्थसमवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात्"

**आभिमुख्य** न० अभिमुखस्य भावः ष्यञ् । अभिमुखत्वे आनुकूल्यार्थसम्मुखीभवने "प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" वाक्यप० । "अनुकूलत्वे २विशेषादाभिमुख्येन चरन्तोव्यभिचारिणः । स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः"सा०द०। तत्र यात्रादौ राहोराभिमुख्यनिषेधः ज्यो०त० "पश्चादर्के विधौ वह्नौ सौम्यां त्रे वायवे कुजे । रक्षोऽधीशे भृगौ याम्यां गुरावीशे शनौ दिने । राहुर्व्वसति यामार्द्धं दिक्स्वगत्या च वामतः । प्रतीच्यां वह्निकोणे तु ततः सौम्यामतोऽम्बुपे । ततः प्राच्यामतोवायौ तस्माद्याम्यां ततः शिवे । रवावेवमन्यवारेषूह्यमेवं क्रमेण हि